# श्री सूक्त यज्ञ

## व्याहृति होम

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः
गुरुसाक्षात परब्रह्म तस्मै श्री गुरवे नमः

ब्रह्मानन्दं परम सुखदं केवलं ज्ञान मूर्तिम्
द्वंद्वातीतं गगन सदृशं तत्त्वमस्यादि लक्ष्यम्
एकं नित्यं विमलमचलं सर्वधी साक्षी भूतम्
भावातीतं त्रिगुण रहितं सद्गुरुं तं नमामि

ॐ चत्वारि शृङ्गा त्रयो ऽस्य पादा द्वे शीर्षे सप्त हस्तासो ऽस्य
त्रिधा बद्धो वृषभो रोरवीति महो देवो मार्त्यामाविवेश

ॐ हिर॑ण्य व॒र्णां हरि॑णीं सु॒वर्ण॑ र॒ज॒तस्र॑जाम् ।
च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मींजा॒तवे॑दो म॒ आव॑ह ॥१॥ स्वाहा

तां म॒ आव॑ह जातवेदो ल॒क्ष्मीमन॑पगा॒मिनी॑॑म् ।
यस्यां॒ हिर॑ण्यं वि॒न्देयं॒गामश्व॒म्पुरु॑षान॒हम् ॥२॥ स्वाहा

अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॑द प्र॒बोधि॑नीम् ।
श्रियं॑ दे॒वीमुप॑ह्वये॒ श्रीर्मा॑ दे॒वीर्जु॑षताम् ॥३॥ स्वाहा

कां॒ सो॒स्मि॒तां हिर॑ण्य प्रा॒कारा॑म् आ॒द्रांज्वल॑न्तीन् तृ॒प्तान् त॒र्पय॑न्तीम् ।
प॒द्मे॒ स्थि॒तां प॒द्म व॒र्णां ता॒मि॒होप॑ह्वये॒ श्रिय॑॑म् ॥४॥ स्वाहा

च॒न्द्रां प्र॑भा॒सां य॒श॒सा॒ज्वल॑न्तीं श्रियं॑ लो॒के दे॒व जुं॒ष्टामु॒दा॒राम् ।
तां प॒द्मिनी॑मीं श॑रणम॒हं प्रप॑द्ये अल॒क्ष्मीर्मे॑ न॒श्यता॒न् त्वां वृ॑णे ॥५॥ स्वाहा

आ॒दि॒त्य व॑र्णे तप॒सोऽधि॑ जा॒तो व॒न॒स्पति॒स्तव॑ वृ॒क्षोथ वि॒ल्वः ।
तस्य॒ फला॑नि॒ तप॒सा नु॑दन्तु मा॒यान्त॑ रा॒याश्च॑ बा॒ह्या अ॑ल॒क्ष्मीः ॥६॥ स्वाहा

उपै॑तु मां दे॑व स॒खः की॒र्तिश्च॒ मणि॑ना स॒ह ।
प्रा॒दु॒र्भू॒तोऽस्मिं॑ रा॒ष्ट्रेऽस्मि॒न् की॒र्तिमृ॑द्धिन् द॒दा॒तु॑मे ॥७॥ स्वाहा

क्षु॒त्पि॑पा॒साम॑लां ज्ये॒ष्ठा॒म् अ॒ल॒क्ष्मीं ना॑शया॒म्यह॑म् ।
अभू॒॑ति॒मसं॑मृद्धिं च॒ स॒र्वां निर्णु॑द मे॒ गृहा॑॑त ॥८॥ स्वाहा

गन्धद्वारां दुराधर्षां नित्य पुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥ स्वाहा

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥ स्वाहा

कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्म मालिनीम् ॥११॥ स्वाहा

आपःसृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ॥१२॥ स्वाहा

आर्द्रां पुष्करिणीं पुष्टिम् सुवर्णां हेम मालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥ स्वाहा

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥ स्वाहा

तां म आवह जातवेदो लक्ष्मीमनपगामिनीं ।
यस्यां हिरण्यं प्रभूतं गावो दास्यो ऽश्वान्विन्देयं पुरुषानहम् ॥१५॥ स्वाहा

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्च दशर्चं च श्री कामः सततं जपेत ॥१६॥

ॐ सर्वं वै पूर्णगम् स्वाहा
ॐ सर्वं वै पूर्णगम् स्वाहा
ॐ सर्वं वै पूर्णगम् स्वाहा

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमे वावशिष्यते
ॐ शांतिः शांतिः शांतिः

**सप्त श्लोकी**
**त्रिसत्य शरणागति**